# शाब्दबोधे निमित्तकारणानि

**भोलानारायणरेग्मी**

Department of Vyakaran (Sanskrit Grammar)
Shree Vinduwasini Sanskrit Vidyapeeth
(Campus), Pokhara, Nepal

*Submitted : 28 Nov.2025*
*Reviewed : 18 Dec.2025*
*Accepted : 31 Dec. 2025*

***DOI:** 10.3126/kdk.v6i1.90128*

***Corresponding Author:***
*Bholanarayan Regmi*

***Email:** drbholanarayanregmi@gmail.com*

**ORCID:** *https://orcid.org/0009000712238330*

*Copyright 2026 © the Author (s) and the Publisher*

**कौमोदकी**
***Kaumodaki***
**Journal of Multidisciplinary Studies**
A Peer-Reviewed, Open Access Journal
**ISSN :**
2822 - 1567 (Print)
2822 - 1583 (Online)
https://www.nepjol.info/index.php/kdk/about

**Published by :**
Research Management Cell
Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

**सारः** शब्दस्यायं शब्दे भव आगतो जातो वा शाब्दः स चासौ बोधः शाब्दबोधः, अर्थात् शब्दप्रमाणजन्यत्वेन विषयीभूतो यो बोधः स शाब्दबोधपदेन व्यवहार्यः । तस्मिँश्च बोधे निमित्तकारणानि आकङ्क्षा- योग्यता- आसत्ति - तात्पर्याणि चतुर्विधानि सन्ति । तेषु वाक्यस्य यः समयः सङ्केतः, तद्ग्राहिका तद्विषयकबोधजनिका आकाङ्क्षा भवतीत्यर्थः बोद्धव्यः । परस्परान्वयप्रयोजकधर्मवत्वं योग्यतात्वम्, यथा जलेन सिञ्चतीति वाक्यमिदं योग्यम्, परन्तु "वह्निना सिञ्चति" इति वाक्यमयोग्यं वह्नेः सेकान्वयप्रयोजकद्रवद्रव्यत्वाभावात् । पदस्य सन्निधानमासत्तिरुच्यते,
प्रकृतान्वयबोधाऽननुकूलपदाव्यवधानमासत्तिरित्यर्थः, यथा "गिरिरग्निमान्" अस्मिन् वाक्ये आसत्तिर्विद्यते "गिरिर्भुक्तमग्निवान् देवदत्तेन" इत्यत्र च अनासन्नत्वान्न शाब्दबोधः, मन्दबुद्धिमतामविलम्बेन शाब्दबोधे कारणत्वमासत्तौ विद्यत इति ध्येयम् । ईश्वरेच्छा तात्पर्यमिति वाक्यस्य ईश्वरेच्छा ईश्वरस्य परम्परया तत्तदर्थबोधने वाक्यप्रयोक्तॄणां तात्पर्यसत्वादुपलक्षणम् । अत एव "वक्तुरिच्छा तु तात्पर्यम्" इति सिद्धान्तमुक्तावल्याः सिद्धान्तो निःसृतः । एतद्वाक्यं पदं वा एतदर्थबोधाय उच्चारणीयमितीश्वरीयेच्छारूपा "तात्पर्यार्थोऽपि केषुचिद्" इति च मतस्य सत्वात् कैश्चिद् तात्पर्यरूपस्य शाब्दबोधनिमित्तकारणे अनपेक्षितत्वेऽपि "सति तात्पर्ये सर्वे सर्वार्थवाचकाः" इति शाब्दिकानां नये भाष्यसिद्धान्तस्य सिद्धत्वादेव घटशब्दात् पटविषयकबोधो न भवति । तस्मात् शाब्दबोधे आकाङ्क्षादीनां निमित्तकारणत्वाद् नानार्थस्थले "सैन्धवमानय" इत्यत्र यात्राप्रसङ्गे घोटकरूपार्थं बोधयति न तु लवणरूपार्थमित्यस्मिन् लघ्वनुसन्धाने शाब्दबोधे निमित्तकारणानां पदज्ञानेन पदार्थोपस्थित्या सह शाब्दबोधरूपफलविषयीभूतानामाकाङ्क्षादीनां प्रमुखाणां प्रसङ्गसङ्गत्या तदन्तर्गतविषयाणां च गभीरतया विचारो विद्यत इति भावः ।

**पारिभाषिकशब्दाः**- आकाङ्क्षा, आसत्तिः, तात्पर्यम्, योग्यता, शाब्दबोधः।

**विषयपरिचयः**

अस्मिन्नालेखे विशेषतया वृत्तिज्ञानाधीनोपस्थितिपदार्थधियः कारणत्वात् तद्घटकत्वात् शक्ति- लक्षणा - व्यञ्जनादयः पूर्वं निरूपिताः प्रसङ्गवशात् तत्र निमित्तकारणभूतानामाकाङ्क्षा - योग्यताऽसत्ति- तात्पर्याणां निरूपणायाऽवश्यकतया तेषामेवात्र विचारणा विद्यते । सह करोतीति व्युत्पत्या कारणविशेषलाभेन केन सह करोतीत्याकाङ्क्षायां कारणेनेति वक्तव्यम् । एवञ्च सहकारिकारणन्नाम गौणकारणं, निमित्तकारणञ्च मुख्यमेव । तथा च मुख्यकारणजन्यकार्यजानकत्वे सति मुख्यकारणभिन्नत्वमिति सहकारिकारणानां लक्षणं पर्यवसितम् । यथा घटकार्यं प्रति कपालस्य मुख्यं कारणत्वं विद्यते । एवमेव "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादौ यागादेः स्वर्गं प्रति मुख्यकारणत्वम् ,अपूर्वस्य (पुण्यस्य वाऽन्यस्य) तु सहकारिकारणत्वम् प्रकृते च लघ्वनुसन्धानविषयविचारघटके पदज्ञानं शाब्दबोधे मुख्यं कारणम्, पदार्थोपस्थित्यादीनान्तु सहकारिकारणत्वं बोध्यं परन्त्वाकाङ्क्षादीनां प्रामुख्यमस्ति । यद्वा स्वावच्छिन्नासमवधानप्रयुक्तफलोपधायकत्वाभाववत् स्वावच्छिन्नकत्वं सहकारिकारणत्वम् । अत्र स्वपदेन सहकारित्वेनाभिमतं विवक्षितम् । तथा च दण्डत्वावच्छिन्नासमवधानप्रयुक्तफलोपधायकत्वाभाववत् कपालत्वावच्छिन्नकत्वं दण्डेष्विति लक्षणस्य समन्वयो बोध्यः । वाक्यशक्तिग्राहकत्वेन आकाङ्क्षाया उपयोगः । घटपटादिरूपार्थज्ञानानन्तरं तदर्थान्वययोग्यार्थस्य आनयनादेर्यज्ज्ञानं ताद्विषयिणीच्छा आकाङ्क्षा भवति । विषयतासम्बन्धस्य विशिष्टबुद्धिनियामकत्वाभावेन समवायसम्बन्धेन च इच्छाया अर्थे विरहेऽपि अयमर्थोऽर्थान्तरमाकाङ्क्षतीति व्यवहारात् तस्याश्चाकाङ्क्षाया अर्थे आरोपः पदे तु नारोऽपः । एवमेव बाधाभावरूपशक्तिग्राहकत्वेन योग्यतायाः प्रकृतान्वयबोधाननुकूलपदाव्यवधानरूपशाक्तिग्राहकत्वेनासत्तेः, वक्तुरिच्छाशक्तिग्राहकत्वेन च तात्पर्यस्य उपयोगः । तात्पर्यञ्च तदितरमात्रबोधेच्छया अनुच्चरितत्वे सति तत्तदर्थबोधजननयोग्यत्वं तात्पर्यत्वमिति परिष्कुर्वन्ति । केचन आचार्या वक्तुरिच्छाविषयीभूतत्वं तात्पर्यत्वमिति च वदन्ति । अपरे आचार्याः "एतद्वाक्यं इदं पदं वा एतदर्थबोधनाय समुच्चारणीयम्" इतीश्वरेच्छारूपं तात्पर्यं स्वीकुर्वन्ति । तेषां मते ईश्वरपदस्य शिष्टप्रयोक्तृमात्रस्योपलक्षणत्वं बोध्यम् । अन्यथा टि- घु -घि- भादि- पाणिनिसंङ्केतितपदेषु ईश्वरेच्छाया अभावेन तेभ्यो बोधो न स्यात् । एवमेव तत्र तत्र शास्त्रकारैः संकेतितपदेभ्योऽपि बोधो न स्यात् एवञ्च शाब्दबोधं प्रति वक्तृतात्पर्यनिश्चयस्य कारणत्वाद् घटपदोच्चारणेन पटपदार्थस्य बोधो न भवति । अन्ये तु न शाब्दबोधमात्रे तात्पर्यस्य कारणत्वम् अपि तु "सैन्धवमानय" इत्यादिनानार्थकेषु शब्देषु इव तत्र च तात्पर्यनिर्णायकप्रकरणादेवार्थनिर्णयसम्भवे तात्पर्यस्यातिरिक्तं शाब्दबोधे कारणत्वं नेच्छन्ति । स्वमते तु नागेशः प्रमाणं प्रस्तुत्य शक्त्या तात्पर्यस्य निर्वाह्यत्वं युक्त्या निराकरोतीति भावः ।

**समस्याकथनम्**

यद्यपि व्याकरणस्य मूलग्रन्थेषु प्रकरणग्रन्थेषु वादग्रन्थेषु च शाब्दबोधनिमित्तकारणविषये बहुभिर्विद्वद्भिः सामान्यतो विशेषरूपेण च समीक्षणं बहुधा कृतं लभ्यते तथापि शाब्दबोधे कारणीभूतानां तद्भेदानाञ्च परिशीलनक्रमे वस्तुगतरूपेण

तत्तदाचार्यणां मतभेदविषयकं स्फुटीकरणं दरीदृश्यते वस्तुतः तात्पर्यंपरिशीलितं न विद्यते। अतः प्रकृतशोधस्थापनात् पूर्वं इमाः मूलभूताः समस्याः सन्ति -

क) शाब्दबोधः कः ?
ख) आकाङ्क्षा का ?
ग) योग्यता का ?
घ) आसत्तिः का ?
ङ) तात्पर्यं किम् ?

**उद्देश्यकथनम्**

व्याकरणशास्त्रस्य मूल-प्रकरण-वादग्रन्थदृष्ट्या शाब्दबोधे निमित्तकारणानां समीक्षणं तद्भेदविवेचनञ्च विधाय तत्तात्पर्यप्रकाशनपूर्वकं समस्यानां कथने उपस्थापितानां प्रश्नानां निराकरणपुरस्सरं निष्कर्षणमेव प्रस्तुतस्य लघुशोधस्य समाधेयं समुद्देश्यं वरीवर्ति।

तथा चेमानि मूलभूतानि उद्देश्यानि विलसन्ति। तद्यथा-

क) शाब्दबोधस्वरूपप्रतिपादनम् ।
ख) आकाङ्क्षाविवेचनम् ।
ग) योग्यतानुशीलम्।
घ) आसत्तेर्विचारः।
ङ) तात्पर्यकथनम्।

**अध्ययनस्यौचित्यम्**

अनेनाध्ययनेन च शाब्दबोधनिमित्तकारणविषये शास्त्रान्तरालोडनेन व्याकरणशास्त्रे विचारितान् कारणानादाय अग्रे चिन्तानाय विचारणाय च साहाय्यसत्वादस्य समौचितिः सिद्ध्यति।

**अध्ययनस्य सीमाङ्कनम्**

शास्त्रान्तरदृष्ट्या सिद्धान्तरूपेण न्यायशास्त्रे व्याकरणशास्त्रे च प्रतिपादितानां शाब्दबोधनिमित्तकारणानां गभीरेण विचारणमेव प्रस्तुतशोधस्य क्षेत्रं वर्तते। तदतिरिक्तानि पदज्ञानम्, पदार्थोपस्थितिः, शक्तिज्ञानञ्चेत्यादीनि कारणानि अत्र न विविच्यन्त इति सीमा वर्तते।

**शोधविधिः**

अस्मिन् शोधकार्ये सामग्रीसङ्कलनविधिः, अध्ययनविधिः, विश्लेषणविधिश्चेति विधिभेदेन शोधो द्विधा विभक्तो वर्तते। प्रसङ्गेऽत्र आदौ आवश्यकसामग्रीसङ्कलनं कथं विहितमिति निर्दिश्यते चेदन्ते च सङ्कलितसामग्रीरादाय कतमञ्च विधिमवलम्ब्य शोधः सम्पादितो विद्यत इति स्पष्टीक्रियते।

*सामग्रीसङ्कलनविधि:*

सम्पादितस्य शोधलेखस्य कृते आवश्यकसामग्रीणां सङ्कलनार्थं भूरिशः पुस्तकालयाः प्रयुक्ता वर्तन्ते । तत्र पुस्तकालयेषु प्राप्ता ग्रन्था एव प्रमुखशोधसामग्रीत्वेन गृहीता: सन्ति । अत्र तावच्छोधलेखे व्याकरण-न्यायगतसंस्कृतमूलाकरग्रन्थाः प्राथमिकसामग्रीत्वेन गृहीता विद्यन्ते । संस्कृतेतरभाषाषूपनिबद्धा व्याकरणशास्त्रस्य शाब्दबोधनिमित्तकारणगतविषयविवेचका ग्रन्थाः तथा च एतद्विद्याविशारदैर्लिखिता लेखाश्च द्वितीयकसामग्रीत्वेन प्रयुक्ताः । एवमेव यथावश्यकं व्याकरणन्यायविचक्षणैः सह संवादादिकमपि कृत्वा सामग्रीसङ्कलनं कृतं विद्यते ।

*अध्ययनविश्लेषणविधि:*

प्रस्तुते लघुनिबन्धे मूलतः समीक्षणात्मको विधिरवलम्बितो वर्तते । अस्मिँश्च निबन्धे शास्त्रनिर्दिष्टान् सिद्धान्ताँश्चाऽऽदाय तेषां विषयाणां विश्लेष्यत्वान्निगमनात्मकविधिरवलम्बित इति ज्ञायते । कथनेनाऽनेनात्र शोधलेखे गुणात्मकविधिरवलम्बित इत्यपि बोद्ध्यः ।

**सैद्धान्तिक आधारः**

सामान्यतो व्याकरणशास्त्रं प्रक्रियाभागार्थिकभागाभ्यां विभागः कर्तुं शक्यते । तत्र बहवः विद्वांस आदौ प्रक्रियाज्ञानं समपाद्यार्थिकभागे न तथा जिज्ञासां प्रकटयन्ति । अतोऽपि दर्शनान्तरीयास्तत्र तत्र शाब्दिकमतमुपस्थाप्य नैकधा निराचक्रुः । एवं स्थिते दीक्षितकौण्डभट्टनागेशादिभिः तेषां मतनिवारणपुरस्सरं पाणिन्यादिमहर्षिसम्मततया वैयाकरणमतं सुस्पष्टीकृतम्। तत्र समासशक्तिविचारः स्फोटविचारः, धात्वर्थविचारः, आख्यातार्थविचारः लकारार्थविचारः शाब्दबोधनिमित्तकारणादय इत्येवं नैकधा परमतखण्डनपुरस्सरं शाब्दिकमतव्यवस्थापनञ्च कृतम् । एवं प्रकारेणैव शाब्दबोधनिमित्तकारणविषयेऽपि दर्शनान्तरीयाः भाष्याशयमजानाना बोधकारणामन्यथैव विवृण्वन्ति स्म, तदा भूषणमञ्जूषादिग्रन्थे त्रिमुन्यभिप्रेतः शाब्दबोधनिमित्तकारणार्थः सप्रमाणमुपपादितः ।

एवञ्च परमतानि परिभाव्य व्याकरणशास्त्राभिमतानां प्रतिपादितानाञ्च शाब्दबोधनिमित्तकारणानां सम्यग्ज्ञानाय तेषां भेदा अपि ज्ञेया एव । तदेव मनसि निधाय वैयाकरणैः शाब्दबोधनिमित्तकारणानि तद्भेदाँश्च व्याख्याताः । अत्र च लघुप्रबन्धे शाब्दबोधनिमित्तकारणसम्बद्धान् व्याकरणशास्त्रगतसिद्धान्तानादाय तद्विश्लेषणव्यापार उपक्रान्तः । एतावता शाब्दबोधनिमित्तकारणसमीक्षणार्थमस्मिन् लेखेऽवलम्बितः सैद्धान्तिक आधारो व्याकरणशास्त्रगर्भित एवेति पुष्यति ।

**आकाङ्क्षाविचारः**

किञ्चिन्निष्ठविषयतानिरूपितविषयितावदिच्छा आकाङ्क्षा । अथवा उत्थापकताविषयतान्यतरसम्बन्धेनार्थान्तरजिज्ञासा आकाङ्क्षा । (भट्टः, २०५४, पृ. ७९) अत्र च यत् पदनिष्ठवत् पदव्यतिरेकप्रयुक्तो यादृशान्वयबोधाभावस्तत् पदे तत्पदवत्त्वमाकाङ्क्षा कथिता । तदुक्तम् -

"यत्पदेन विना यस्याननुभावकता भवेत् सा अकाङ्क्षा"। (भट्टाचार्यः, २०४५, पृ. ११२) ।

यथा- प्रकृतिं विना प्रत्ययस्य, प्रत्ययेन विना प्रकृतेः शाब्दबोधाजनकत्वमनुभवसिद्धमित्यनयोराकाङ्क्षा अवगम्यते।

अर्थात् प्रकृत्या प्रत्ययस्य, प्रत्ययेन च प्रकृतेराकाङ्क्षा वर्तते इत्येव तावत् सिद्धम्। एवमन्यत्रापि वेदितव्यम्। तथा च स्वावहितपूर्वत्व-स्वाव्यवहितोत्तरत्वान्यतरसम्बधेन यत्पदनिष्ठ- यत्पदव्यतिरेकप्रयुक्तो यादृशान्वयबोधाभावस्तत्पदे तत्पदवत्वमाकाङ्क्षात्वमिति तु फलितः । भवति च अव्यवहितपूर्वत्वसम्बन्धेन घटपदनिष्ठस्यानुस्वारपदस्य व्यतिरेकप्रयुक्ताधेयतासम्बन्धेन घटवत् कर्मत्वमिति भेदान्वयबोधाभाव इति स्वाव्यवहितपूर्वत्वसम्बन्धेन घटपदेऽनुस्वारपदवत्त्वमाकाङ्क्षा वर्तते। अयमाशयः- येन पदेन विना पत्पदस्यान्वयाननुभावकवत्वं भवेत् तेन पदेन सहैव तस्य पदस्य आकाङ्क्षा जायते। यथा- क्रियापदं विना कारकपदं नान्वयबोधं जनयति इति भवति क्रियापदेन सह कारकपदस्याकाङ्क्षा । इदं च सर्वमपि विवेचनं ज्ञायमानपदस्य कारणतामते एव साधुत्वं सङ्गच्छते । अत एव "शाब्दह्याकाङ्क्षा शब्देनैव प्रपूर्यते" इति न्यायोऽपि सङ्गच्छते। अन्यच्च प्रमाणं यथा-

प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।
पदानामेव सा शक्तिर्वरमभ्युपगम्यताम्॥ (उपाध्यायः, १९९०, पृ. ५५४-५५)

इत्यपि साधुसङ्गता भवति।

एतेषामयमाशायो यत् पदज्ञानात् पदार्थेभ्यश्च प्रथमोपस्थिततत्वात् पदस्य पदार्थाभिधायकत्वाच्च पदस्य, वाक्यार्थज्ञानहेतुभूततात्पर्यज्ञानजनकत्वाच्च पदस्य पदार्थान् विहाय पदेषु इव शाब्दबोधजनकतावच्छेदिका शक्तिः स्वीक्रियते। शाब्दबोधं प्रतिज्ञायमानपदस्य कारणतावादिनामपि अयमेवाशयः।

पदज्ञानस्य कारणतावादिमते तु स्वाव्यवहितपूर्वत्व - स्वाव्यवहितोत्तरत्वान्यतरसम्बन्धेन यत्पदविशेष्यको यत्पदप्रकारकोपस्थिति- व्यतिरेकप्रयुक्तो यादृशान्वयबुद्ध्यभावस्तादृशपूर्वोक्तान्यतरसम्बन्धेन तत्पदे तत्पदवत्वमाकाङ्क्षा इत्येव वक्तव्यम्। अन्यथा असंभवदोषापत्तिः स्यादित्यपि विभावनीयम्।

पदज्ञानस्यैव हेतुत्वेन "घटवत्कर्मत्वम्" इति भेदान्वयबुद्ध्यभावादौ घटपदनिष्ठस्यानुस्वारपदादेर्व्यतिरेकप्रयोजकत्वाभावात् कारणाभावस्यैव कार्याभावप्रयोजकत्त्वात् । तथा च आधेयत्वसम्बन्धावच्छिन्न- घटत्वावच्छिन्न- प्रकारतानिरूपितकर्मत्वत्वावच्छिन्नविशेष्यताशालिशाब्दबुद्धित्वावच्छिन्नं प्रति स्वाव्यवहितोत्तरत्वसम्बन्धेन घटपदविशिष्टाया घटपदत्वरूपाऽऽकाङ्क्षायाः ज्ञानं कारणमिति तु निष्कृष्टार्थः फलित इति भावः। परन्तु समभिव्याहाररूपा आकाङ्क्षेति प्राचीनानां मतं निराकुर्वतां नव्यानां नयं स्पष्टयति- वस्तुतस्तु क्रियाकारकपदानां सन्निधानमासत्त्यैव स्पष्टीकृतं भवति, किन्तु घटकर्मताविषयकबोधं प्रति घटपदोत्तरद्वितीयाविभक्तिरूपाकाङ्क्षाज्ञानं कारणम्, इति "घटः कर्मत्वम्"- "आनयनं कृतिः" इत्यादौ न शाब्दबोधः। एवञ्च तादृशबोधं प्रति "अम्" पदाव्यवहितपूर्ववर्तिघटपदत्वरूपाऽऽकाङ्क्षाज्ञानं कारणमित्यपि बोध्यम्। तथा च कर्मताविशेष्यक - घटप्रकारकशाब्दबोधं

प्रति "घटम्" इत्याकाराणानुपूर्विज्ञानं कारणम् । एवम् आनयनानुकूलकृतिमानित्याकारकशाब्दबोधं प्रति च "आनय" इत्येतादृशानुपूर्वी यद् ज्ञानस्य कारणत्वं वर्तत इति स्वीकारे नास्ति कोऽपि दोषः ।

"अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्" इत्यादिस्थलीयशाब्दबोधाभावोपपत्तये समभिव्याहाररूपाकाङ्क्षाज्ञानस्य हेतुताया आवश्यकतैव नास्ति, किन्तु तत्र स्थले पुत्रेण सह राजपदस्य तात्पर्यग्रहसत्त्वे तेनैव सहान्वयबोधो जायते । पुरुषेण सह तात्पर्यग्रहसत्त्वे तु तेनैव सह राजपदस्य शाब्दबोधो जायत इत्येवास्ति तत्र सिद्धान्तः । एतादृशस्थले वक्तुस्तात्पर्यज्ञानमादायैव निर्वाहो जायत इत्यपि बोध्यम् ।

**योग्यतानिरूपणम्**

शाब्दबोधीयप्रकारतावच्छेदकसम्बन्धेनाऽपरपदार्थवत्त्वं योग्यतात्वम् । तदुक्तं नैयायिकैः- "पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता" । (भट्टाचार्यः, २०४५, पृ. ३०९) वैयाकरणास्तु परस्परान्वयप्रयोजकधर्मवत्वं योग्यतात्वम् । (भट्टः, २०५४, पृ. ८०) । तत्तत्प्रकारतावच्छेदकसम्बन्धकथनेन सेकादौ वह्निजन्यत्वादेः कालिकसम्बन्धेन सत्त्वेऽपि वह्निना सिञ्चतीत्यत्र न योग्यताया आपत्तिः । केषाञ्चिद् विदुषामेकपदार्थे अपरपदार्थसम्बन्धो योग्यता इत्यपि मतं वर्तते । एतद् योग्यताज्ञानाभावादपि वह्निना सिञ्चतीत्यत्र न शाब्दबोधो जायते । ननु एतस्या योग्यतायाः ज्ञानं शाब्दबोधात् प्राक् सर्वत्र न संभवति, वाक्यार्थस्य अपूर्वत्वाद् इति चेन्न तेषां तेषां पदार्थानां स्मरणे जायमाने सति "स्वर्गकामो यजेत" इत्यादौ क्वचित् संशयरूपस्य, अस्य करतले आमलकमस्ति इत्यादौ च क्वचिन्निश्चयरूपस्य योग्यताज्ञानस्य आवश्यकरूपेण संभवात् न कश्चिद् दोषः। संशय-निश्चय- साधारणयोग्यताज्ञानं शाब्दबोधे कारणमस्तीति प्राचीनैः स्वीकृतमिति भावः । योग्यताज्ञानस्य अभावकाले शाब्दबोधस्याऽभावोऽपि अनुभव सिद्ध एवेति तत्र तद्धीहेतुतया योग्यताज्ञानेन अन्यथासिद्धतया बाधाभावोऽपि न शाब्दबोधहेतुरित्याशयः ।

नव्यनैयायिकानामयमाशयो यद् योग्यताज्ञानस्य अभावकालेऽपि शाब्दबोधोऽनुभवसिद्ध एवेति स्वीकृतमिति न प्राचीननैयायिकैः स्वीकृतं योग्यताज्ञानं शाब्दबोधे कारणम् । न वा तादृशयोग्यताज्ञानेन पूर्वोक्तान्यथासिद्धिरिति योग्यताज्ञानाभावनिश्चये जाते सतीति । अथवा योग्यताज्ञानशून्यकाले शाब्दबोधापत्तिः संभवति, अतो बाधाभाव एव योग्यता - सा च स्वरूपसती एव शाब्दबोधे कारणम् , इत्याशयं मन्वानैरेव नव्यनैयायिकैः पूर्वोक्तस्य प्राचीननैयायिकाभिमतस्य योग्यताज्ञानस्य शाब्दबोधं प्रति कारणत्वमेव नास्ति । वह्निना सिञ्चतीत्यत्र कथं तर्हि शाब्दबोधो न जायते इत्येवं प्रश्ने समुपस्थिते सेचनात्मके कर्मणि वह्निकरणकत्वाभावरूपाया योग्यताया निश्चयेन प्रतिबन्धान्न शाब्दबोधः । एतेषां नये वह्निना सिञ्चतीत्याद्ययोग्यतास्थलीयशाब्दबोधे बाधाभावरूपाया योग्यताया अभावेन अयोग्यतानिश्चयस्तत्र प्रतिबन्धकः, तादृशाऽयोग्यतानिश्चयाभावस्तत्र कारणम् । विश्वनाथपञ्चाननेनापि स्पष्टमुद्घोषितं यत् - "वह्निना सिञ्चतीत्यादौ सेके वह्निकरणत्वायाभावरूपा योग्यतानिश्चयेन प्रतिबन्धान्न शाब्दबोधः" (भट्टाचार्यः, २०४५, पृ. ३१०) । अर्थात् वह्निना सिञ्चतीत्यत्र "सेकः वह्निकरणकत्वाभाववान्" इत्याकारकस्य अयोग्यतानिश्चयस्य बाधनिश्चयात्मकस्य प्रतिबन्धकस्य सत्त्वे शाब्दबोधो न जायत अतो योग्यतानिश्चयाभावस्य लौकिकसन्निकर्षाजन्यदोष - विशेषजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वाद् ज्ञानमात्रान्तर्गतशाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं तावत् सिद्धम् । तदुक्तम् "तदभावनिश्चयस्य

किकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वाच्छाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम् ।" (भट्टाचार्यः, २०४५, पृ. ३१०-१२ ) । तथा च योग्यतानिश्चयाभावस्य तद्धर्मावच्छिन्नविशेष्यतानिरूपित -यद्भावप्रकारकनिश्चयत्वेन तद्धर्मावच्छिन्न- विशेष्यतानिरूपित - तत्प्रकारताशालिज्ञानत्वावच्छिन्नमात्रे प्रतिबन्धकत्वम् ।

ननु पूर्वमतकथितयोग्यताज्ञानस्य कारणत्वे तादृशयोग्यता-ज्ञानशून्यकाले तादृशस्थले शाब्दबोधाऽभावोऽपि किम् आनुभाविक एवेति शङ्का स्वयमेव निराकृता नवीननैयायिकैः, यत् योग्यताज्ञानविलम्बेन शाब्दबोधो न जायत इति नास्ति प्रमाणिकी कथा । तदुक्तम् -योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्ब असिद्धः , अर्थात् योग्यताज्ञानविलम्बेन तत्र शाब्दबोधो न जायते इति च तेषां कथनं सर्वथा प्रामाणिकम् । इति तादृशानुभवे प्रमाणाभावेन न तदनुरोधेन योग्यताज्ञानस्य कारणत्वं सिद्ध्यतीति भावः ।

**आसत्तिविचारः**

प्रकृतान्वयबोधानुकूलपदाऽव्यवधानमासत्तिः । ययोः पदयोः परस्परान्वयबोधजनकत्वे तात्पर्यं तयोः पदयोः प्रकृतस्यान्वयबोधस्य अननुकूलपदेन - अजनकपदेन, अव्यवधानमासत्तिः । तस्याः स्वरूपसत्याः शाब्दबोधे कारणमिति प्राचीनाः । एतावता प्रबन्धेन शाब्दबोधं प्रति वृत्तिज्ञानसहकृतपदज्ञान-जन्यपदार्थोपस्थितिद्वारा पदज्ञानस्य कारणत्वं सर्वथा निरावादमेवेति सिद्धम् । तथा सति "गिरिर्भुक्तमग्निमान् देवदत्तेन" इत्यत्र शाब्दबोधानुत्पादेन, एवं "वह्निना सिञ्चति" इत्यत्रापि तथैव शाब्दबोधानुत्पत्त्या "घट : कर्मत्वं आनयनं कृतिः" इत्यादौ च शाब्दबोधो न इत्यत्र कि कारणम् ? इति जिज्ञासायां जायमानायां श्रीविश्वनाथपञ्चाननेन (२०४५) स्पष्टमुद्घोषितं यद् - आसत्तियोग्यताऽऽकाङ्क्षा तात्पर्यज्ञानमिष्यते । (पृ. ३०२) इति । कारणं सन्निधानं तु पदस्यासत्तिरुच्यते (पृ. ८३) इति च । आसत्तिश्च योग्यता च आकाङ्क्षा च तात्पर्यं चेति द्वन्द्वसमासः, तेषां ज्ञानमिति तत्पुरुषः । द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकभिसम्बध्यते (दीक्षितः,१९८६, पृ. ३७७) इत्येवं रूपेण आसत्तिज्ञानम्, योग्यताज्ञानम्, आकाङ्क्षाज्ञानम्, तात्पर्यज्ञानञ्चेति कारणमित्येवार्थः फलितः ।

एवञ्च आसत्तिज्ञान - योग्यताज्ञान- आकाङ्क्षाज्ञान- तात्पर्यज्ञानानां शाब्दबोधे सहकारिकाणत्वान्नोक्ताऽन्वयव्यभिचार इत्यर्थः । पदस्य सन्निधानमित्यासत्तिलक्षणेन पदाव्यवधानरूपासत्तिरित्यर्थो लभ्यते । एवञ्च 'गिरिर्भूक्तमग्निमान् देवदत्तेन' इत्यासत्तिविरहवति वाक्ये अतिव्याप्तिः, यतो हि अत्रापि "घटं नय" "गामानय" इत्यादिवद् गिरिपदभुक्तपदयोरव्यवधानोपस्थितेः सत्त्वादेव एतादृशातिव्याप्तिवारणाय श्रीविश्वनाथः स्वयमेवोक्तम् -"यत् पदार्थेन यत् प्रदार्थस्याऽन्वयोऽपेक्षितस्तयोरव्यवधानेन उपस्थितिः शाब्दबोधे कारणम्" (भट्टाचार्यः, २०४५, पृ. ३०३) । तथा च तादृशपदाव्यवधानमेवाऽऽसत्तिः तदुपस्थितिश्च शाब्दबोधे कारणम् । अत एव यत्र तत्र गद्यपद्यादौ व्यवधानेन पदानामुपस्थितिर्दृश्यते तत्र तत्र च तादृशपदानां योजनया एव अव्यवहितोपस्थितिः शाब्दबोधे कारणत्वेन सर्वसम्मतो वर्तते । तथा च पूर्वोक्तस्थले "गिरिर्भुक्तमग्निमान् देवदत्तेन" अयमंशः (भट्टः, २०१७, पृ. ९२) इत्यादौ गिरिपदार्थाग्निमत् पदार्थयोरेव तात्पर्यविषयता इति तत्र तयोरव्यवधानाभावान्नातिव्याप्तिः । "नीलो घटो द्रव्यं पटः" इत्यादौ तु नीलपदार्थ-पटपदार्थयोरन्वयबोध - तात्पर्येणोच्चरितस्य "नीलो घटो द्रव्यं पटः" इत्यादिवाक्ये च आसत्तिभ्रमादेव शाब्दबोधो जायते नान्यथेति भावः । नीलपद - पटपदयोस्तात्पर्यघटिताऽऽसत्तेरभावादित्यर्थः । तत्रापि तद्धीहेतुत्वमावश्यकमिति भावः । सा च

धीर्यदि भ्रमात्मिका स्यात् तदा तत्र स्थले शाब्दबोधोऽपि भ्रमात्मक एव स्यादित्यत्र नास्ति कश्चन नियमः, अत आसत्तिभ्रमस्य न शाब्दबोधभ्रमकारणत्वमस्ति किन्तु योग्यताभ्रमस्यैवेति विभावनीयमित्यर्थः । तदुक्तं विश्वनाथपञ्चाननेनापि - आसत्तिभ्रमेण शाब्दभ्रमाभावेऽपि न क्षतिः । (भट्टाचार्यः, २०४५, पृ. ३०३)

ननु योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वादिति नियमेन "छत्री कुण्डली वासस्वी देवदत्तः" इत्यादिवाक्यं यत्रोक्तं तत्र स्थले उत्तरपदस्मरणेन पूर्वपूर्वपदस्मरणस्य विनाशादव्यवधानेन तेषां तेषां पदानां स्मरणं कथं संभवति । तथा च अनेकविशेषणवाचकपदघटित - वाच्यार्थविषयकबोधानुपपत्तिश्च स्यात् विशिष्टाऽनुभवस्य विशेषणज्ञानसाध्यत्वनियमात् । अत एव अनेकवर्णकपदस्मरणासंभवोऽपि बोध्य इति चेन्न, प्रत्येकपदानुभवजन्यसंस्कारैश्चरमं तावत् पदविषयकस्मरणस्यापि अव्यवहितरूपेण उत्पत्तिदर्शनादिति बोध्यम् । यथा संयोगसम्बन्धेन च "अयं घटः" इत्याकारकं घटप्रत्यक्षं जायते, संयुक्तसमवायेनापि सम्बन्धेन घटप्रत्यक्षं भवति, क्वचिद् घटप्रत्यक्षं संयुक्तसमवेतसमवाय-सन्निकर्षेणापि तत् प्रत्त्यक्षं जायते । अतो नानासन्निकर्षैरेकप्रत्यक्षस्य इव नानासंस्कारैरपि एकस्मरणसंभवे का नो हानिः को वा तत्र दोषः इति वक्तव्यम् । तावत्पदविषयकसंस्कारसहितचरमवर्णस्यैव तत्रोद्बोधकत्वात्, कथमन्यथा नानावर्णैरेकपदस्मरणमिति । वर्णानामाशुविनाशितया क्रमोत्पन्नवर्णानामेकप्रत्यक्षाप्रत्यक्षासंभवेन एकसंस्काराभावादिति । वस्तुत अव्यवहितपदार्थोपस्थितिरासक्तिः स्वरूपसत्त्या कारणं श्लोकादौ योजनापि तदर्थमेव भवतीति ध्येयम् ।

ननु आशुतरविनाशिनीनां क्रमिकाणां पदजन्यपदार्थोपस्थितीनामपि एकत्रासंभवेन सर्वत्र शाब्दबोधे पदजन्यपदार्थोपस्थितिः समूहालम्बनात्मिकेव कारणम् । एवञ्च सर्वत्रैव एक कालावच्छेदेन समस्तपदार्थानां विशेष्ये विशेषणम्, तत्रापि विशेषणमिति रीत्यैव अर्थात् विश्रृङ्खलभावेनैव शाब्दबोधो जायते न तु विशिष्टस्य वैशिष्ट्यमित्येवं रूपेण तत्र स्थले शाब्दबोधोऽभिमतो वर्तते, यतस्तज्जनक- विशेषणतावच्छेदकप्रकारक-निश्चयस्यैव पूर्वमभावादिति अयमेव विषयः तत्वचिन्तामणिकारसम्मतो वर्तते । मणिकारस्याऽयमेवाऽशयो वर्तते यत् तावत् पदार्थानां क्रियाकर्मभावेन च अन्वयबोधरूपः शाब्दबोधो भवतीति केचन मणिकारमतानुयायिन इत्थं समुद्गिरन्ति । तथा हि -

वृद्धा युवानः शिशवः कपोताः
खले यथाऽमी युगपत् पतन्ति ।
तथैव सर्वे युगपत् पदार्थाः
परस्परेणान्वयिनो भवन्ति ॥ (भट्टाचार्यः, २०४५, पृ. ३०५)

अपरे च पुनरित्थं वदन्ति -

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते ॥ (भट्टाचार्यः, २०४५, पृ. ३०६)

एतेन खण्डवाक्यार्थबोधः सूचितः । तथा चाऽवान्तरवाक्यार्थबोधात्मकखण्डवाक्यार्थविषयकबोधजन्यस्मृत्युत्तरं तथैव पदार्थस्मृत्वा महावाक्यार्थबोधोऽपि जायत इत्यर्थः ।

वस्तुतस्तु पूर्वपदार्थस्य पदान्तरस्य च स्मृतिरेका, ततः खण्डवाक्यार्थबोधः, तदनन्तरं पदार्थान्तरस्मृतिः, ततो महावाक्यार्थबोधः। अत एव वृत्तिधीप्रयोज्यत्वस्य एकस्य दुर्वचत्वेऽपि न क्षतिः।

खण्डवाक्यार्थबोधस्यैव विशेष्यविशेषणतावच्छेदकप्रकारकबोधरूपतया तद्धेतुतयैव विशिष्टे वैशिष्ट्यम् इति, विशिष्टस्य वैशिष्ट्यमिति च रीत्या शाब्दबोधोपपत्तिः । एवञ्च अवान्तरशाब्दबोधात्मक- पदज्ञानजन्यपदार्थज्ञानेन अवान्तरशाब्दबोधात्मकखण्डवाक्यार्थविषयकऽबोधात्मकानुभवजन्य- तत् समानाकारकस्मरणेन वा महावाक्यार्थबोधो जायत इति तु परमार्थः । इत्थं च सर्वत्र अवान्तरशाब्दज्ञानानन्तरमेव महावाक्यार्थविषयको बोधो जायते । तादृशशाब्दबोधस्य च विशिष्टवैशिष्ट्यावगाहिबोधरूपत्वमेव तत् सामग्रीसत्त्वात् । अवान्तरशाब्दबोधस्यापि विशिष्ट -वैशिष्ट्यावगाहिबोधरूपता एव स्वीक्रियते । घटत्वादिप्रकारकस्मरणात्मक- विशेषणतावच्छेदकप्रकारकनिर्णयस्य विद्यमानत्वेन न कोऽपि दोषः समापततीति भावः ।

पटपदस्य पकारोत्तर- अकारोत्तर- टकोरात्तर - अत्वरूपानुपूर्वीरूपतया क्रमिकाद्यविनाशिनानावर्णात्मिकतया क्षणिकत्वेन शक्तिज्ञानस्य कथमप्यसंभवेन अर्थोपस्थापकत्वासंभवात् स्फोटनामकः कश्चित् पदार्थः स्वीक्रियते तद्यथोच्यते ।

**स्फोटस्वरूपविचारः**

स्फुटति -अभिव्यक्तो भवति, अर्थो यस्मादिति व्युत्पत्त्या अर्थप्रकाशकत्त्वं वर्तते । प्रकाशश्च ज्ञानरूपमेव विद्यते इत्त्येवास्ति शाब्दबोधविषये वैयाकरणानां मतम् । तन्न समीचीनं प्रतिभाति- पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहितचरम - वर्णानुभवरूपाद् बोधकोद्बोधितचरमवर्णविषयकसंस्कारेणैव क्रमिकतत्तद्वर्णविषयकपदस्मरणस्य उपपादितत्वेन तावद् वैयाकणैः स्वीकृतो वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तो भवति । एवमेव स्फोटान्तराणामपि विषये च बोद्धव्यम् । तथा हि वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदस्फोट: वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटश्च इत्यष्टविधाःस्फोटाः सन्तीति विभावनीयम् । तत्र "सुप्तिङन्तं पदम्" ( पा.सू. १।४।१४) इति पदलक्षणलक्ष्यघटकीभूतावयवविशेषस्फोटः प्रकृतिस्फोटः, प्रत्ययस्फोटः, इत्यादिनाम्ना वर्णस्फोटोऽभिधीयते इति केचिद् वदन्ति । अन्ये तु पूर्वपूर्ववर्णविषयकसंस्कारसहित-चरमवर्णज्ञानस्यैव शाब्दबोधहेतुतया तादृशचरमवर्णस्फोट एव वर्णस्फोटशब्देन व्यवह्रियते इत्यपि वदन्ति । स्फोटत्वं च अर्थनिष्ठशाब्दबोधविषयतावच्छेदकशक्तिमत्त्वम् । तच्च सुप्तिङन्तात्मकपदेऽप्यस्तीति पदस्फोटः पृथगेव स्वीक्रियते। समभिव्याहृतवर्णानामर्थबोधजनवत्वान्न केवलं चरमवर्णस्फोट एव स्वीकृतो वर्तत अपि तु यावद्वर्णस्फोटोऽङ्गीक्रियत इत्यर्थो मन्तव्यः ।

पदस्फोटश्च तादृशवर्णकूटरूपः, तादृशकूटश्च प्रकृतिप्रत्ययरूपेण पृथगेव स्वीक्रियत इत्यतः पदस्फोटः प्रकृतिस्फोटः, प्रत्ययस्फोटश्चेति नाम्ना व्यवह्यते । "घटेन" इत्यादौ "घटे" इति प्रकृतिः, "न" इति प्रत्ययः इत्यादिकं सर्वं विभज्य दर्शयितुमशक्यत्वात् । युष्मदस्मदोः षष्ठी- चतुर्थी-द्वितीयास्थयोर्वान्नावौ (पा.सू.८।१।२०) इति सूत्रेण विधियमाने षष्ठ्यादिस्थले वस् - नस्, ते- मे, वाम्- नौ, इत्यादौ प्रकृतिप्रत्ययविभागासंभवाच्च पदेष्विव वाक्येऽपि शाब्दबोधजनकत्वसत्त्वात्

वाक्यस्फोटः पदस्फोटादतिरिक्त एव सिद्ध्यति नत्वनतिरिक्त इति भावः ।"एचोऽयवायावः" (पा.सू. ६।१।७८) सूत्रस्य उदाहरणादौ च हरे व, विष्णो व, इत्यादौ पदविभागासंभवेऽपि शाब्दबोधो दृश्यत इत्यत्र नास्ति लेशतोऽपि संशयावसरः।

केषाञ्चिद् विदुषामियमपि उक्तिर्वर्तते पदे वाक्ये च वर्णा एव न सन्ति, तत्र अनन्तवर्णकल्पनायां महद् गौरवमस्ति। तत्र वर्णाभिव्यञ्जक - वायुसंयोगनिष्ठवैजात्येनैव ककारः गकार इत्यादि प्रतीतिवैलक्षण्यसंभवात् । न चैवं तादृशवायुसंयोगस्यैव वाचकत्वमस्त्विति वाच्यम्, तस्य अप्रत्यक्षत्वात् । इत्थं च अखण्डौ पदस्फोटवाक्यस्फोटौ इति अन्यमतसङ्गृहीतस्फोटाभ्यां सह पञ्चव्यक्तिस्फोटाः संजायन्ते।

तत्र च जातौ एव शक्तिर्न तु व्यक्तौ लाघवादिति मीमांसकमतसिद्धा शक्तिर्यथा जातौ स्वीक्रियते, तथैव शक्तताऽपि वर्ण - पदादिजातावेवेति । आनुपूर्विविशेषाच्च स्फोटाभिव्यक्तिरिति वर्णजातिस्फोटादिभेदे न त्रयः स्फोटाः स्वीक्रियन्ते मतान्तरानुसारिभिः । स्फुट्यते-प्रकाश्यतेऽर्थोऽनेनेति वर्णादिषु तदुपलब्धेः । तत्र स्फोटशब्दस्य गौरवापादकपृथक् प्रयोगमात्रमिति नातोऽतिरक्तं तत्र किमपि तत्त्वमिति भावः । एवञ्च प्रसङ्गसङ्गत्यनुसारी स्फोटविषये सर्वैरपि दार्शनिकैर्गले पतिततया साधकबाधकाभ्यां लक्षणप्रमाणाभ्यां प्रतिपाद्यत एव । तद्यथा -

स्फुटति अभिव्यक्तो भवति प्रकाशत अर्थो यस्मात् स्फुट्यते व्यज्यते वर्णैर्यः स इति वा स्फोटत्वम् अर्थात् अर्थप्रकाशकत्वं फलति । प्रकाशश्च ज्ञानमेव एवञ्च मध्यमानादव्यङ्ग्यत्वे सति अर्थप्रकाशकत्वं स्फोटपदार्थत्वं सिद्धमिति भावः (शास्त्री, १९९६, पृ. २६) । इदानीं कीदृशस्वरूपतामापन्नोऽस्ति अयं स्फोट इति विचार्यते शब्दब्रह्म एव स्फोट इति । तच्च विचिकीर्षावशाद् घनीभूतायाश्चितेर्विन्दुभावमापन्नायाः स्वरूपेणाभिद्यमानाऽवस्था। यथोक्तं भगवच्छङ्करपादैः-

विन्दोस्तस्माद् विद्यमानादव्यक्तात्मा खोऽभवत्।
स खः श्रुतिसंपन्नैः शब्दब्रह्मेति कथ्यते॥ ( शङ्कराचार्यः, १९३५, पृ. ३१)

इयमेव परा "वाक्" इत्युच्यते । सोऽयं रवः कारणबिन्दुतादात्म्यापन्नो व्यञ्जकयत्नसंस्कृतपवनवशात् प्राणिनां मूलाधारे एवाऽभिव्यज्यते । तदेव च शब्दब्रह्म हृदयपर्यन्तमागतं मध्यमेत्युच्यते । वदनपर्यन्तमागतं च तदेव शब्दब्रह्म परश्रोत्रप्रत्यक्षविषयतायोग्यतासम्पन्नं वैखरी उच्यते। तदुक्तं भगवच्छङ्कराचार्यचरणैः-

मूलाधारात् प्रथममुदितो यश्च भावः पराख्यः
पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः।
व्यक्तेर्वैखर्यथ रुरुदिषोरस्य जन्तोः सुषुम्णा
बद्धस्तस्माद् भवति पवनप्रेरिता वर्णसंज्ञा॥ ४३॥ (शङ्कराचार्यः, १९३५, पृ. ३३)

श्रुता वपि चोक्तम् -

चत्वारि वाक् परिमितापदानि।
तानि विदुर्ब्रह्मणा ये मनीषिणः॥

गुहा त्रीणि निहिता नेङ्गयन्ति।
तुरीयं वाचो मनुष्या वदन्ति ॥ (पतञ्जलिः,१९९९, पृ. ४२)

नव्यवैयाकरणैश्च वर्णोत्पत्तिक्रममुपपाद्य वर्णात्मकमेव आचार्यादिभिः प्रतिपादितं शब्दब्रह्मैव स्फोट इत्यभिगीयते । प्राचीनैस्तु तत् "शब्दब्रह्म पृथगेवास्ति" तत्त्वमिति निरूप्यते कथ्यते च, यतो हि वर्णानामुत्पत्ति-विनाशशालित्वात् भट्टोजिदीक्षितैस्तु वर्णातिरिक्त एव स्फोट इति कथ्यते-पदमिति प्रतीतेः। अयञ्च स्फोट अर्थप्रत्यायकत्वेन वैयाकरणैः स्वीक्रियते । वर्णात्मकशब्दानां तदसंभवात् । न हि एकैकेषां वर्णानामर्थविषयकबोधजनकत्वं वर्तते । घकारादिशब्दानां घटाद्यार्थविषयकबोधाजनकत्वात् ।

शाब्दबोधे पदार्थज्ञानकारणत्ववादिनां मते तु यथा - केषाञ्चिद् विदुषामिदपि कथनं वर्तते यत् शाब्दबोधे न पदज्ञानं कारणम्, नापि प्राचीननैयायिकाभिमतं ज्ञायमानं पदं वा कारणम् । अपि तु पदार्थ एव कारणम् । अत एव रचनायोग्यस्य काव्यस्य अर्थं प्रबुध्यैव पदम्, पदानि, श्लोकं वा कविः कल्पनाभावरूपेण रचयति । कविर्हि काव्यरचनार्थं तद्गुणान् अर्थान् चिन्तयति । ततश्चिन्तावशोपस्थितपदार्थानामन्वयं बुद्ध्या काव्यं रचयति । एतच्च चिन्तावशोपस्थितपदार्थानामन्वयबोधात् कविः काव्यादिः, इति चिन्तामणौ स्पष्टीकृतम् । तच्च पदार्थज्ञानं न प्रत्यक्षरूपं असन्निकृष्टविषकत्वात् । नाप्यनुमितिरूपम् - व्याप्तिज्ञानस्य पूर्वमभावात्, नापि शाब्दबोधरूपं शब्दाभावात्, किन्तु अन्वयबोधरूप एव । तादृशबोधे च चिन्तावशोपस्थिता एव पदार्थाः कारणानि भवन्ति न तु पदानि पदज्ञानानि वेति ध्येयम् । क्वचित् पदार्थोपस्थितस्य अर्थं पदस्यापेक्षणेऽपि पदार्थोपस्थित्या पदमन्यथासिद्धमेवेति भावः । कथमन्यथा - श्वेतरूपदर्शनात् हेषा शब्दस्य वा श्रवणात्खुरविक्षेपशब्दश्रवणात् शब्दं विनापि श्वेतोऽश्वो धावतीति धीर्जायते। तदुक्तमपि -

पश्यतः श्वेतमारूपं हेषा शब्दञ्च शृण्वतः ।
खुरविक्षेपशब्दश्च श्वेतोऽश्वो धावतीति धीः ॥ (उपाध्यायः,१९९०, पृ. ५५३ साभारो न्यायकौस्तुभस्य प्रत्यक्षखण्डे पृ. ४७)

एवञ्च आवश्यकस्वीकार्यपदार्थोपस्थितौ पदमन्यथा सिद्धमेव सिद्धम् । अत एव द्वारमित्युक्तं न "पिधेहि" इति शब्दस्याऽध्याहारः क्रियते, किन्तु पिधानादिरूपार्थाध्याहार एव स्वीक्रियते।

**तात्पर्यस्य समीक्षणम्**

वैयाकरणाः- एतद् वाक्यं पदं वा एतदर्थबोधाय उच्चारणीयमितीश्वरेच्छा तात्पर्यम् । ( परमलघुमञ्जूषायाः पृ. ८४) अत्र ईश्वरपदं प्रोयोक्तृमात्रे उपलक्षणम् , अत एव "सति तात्पर्ये सर्वे सर्वार्थवाचकाः" इति भाष्यकारीय -सिद्धान्तोऽपि साफल्यं भजते। तस्मादेव शाब्दिकानां सिद्धान्ते घटपदात् पटप्रत्ययो न भवति तत्र तात्पर्याभावो विपरितज्ञानाभावे कारणमिति बोध्यम् । आहोस्विद् नैयायिकास्तु "वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्" । (भट्टाचार्यः, २०४५, पृ. ३१५) अस्माच्छब्दात् श्रोतुः पुरुषस्य एतदर्थविषयकबोधो जायताम् इत्याकारिकया वक्तृपुरुषस्येच्छा सैव तात्पर्यम् । तादृशतात्पर्यज्ञानञ्च शाब्दबोधे कारणम् । यथा- "घटम्" इति पदम् आधेयतासंसर्गक- घटप्रकारक - कर्मताविशेष्यकबोधं जनयतु इत्याकारिका इच्छैव तात्पर्यम्, तादृशेच्छाया ज्ञानं श्रोतृपुरुषस्य जायते । तच्च ज्ञानम्- अनेन "घटम्" इति पदमाधेयतासंसर्गेण घटप्रकारक -

कर्मताविशेष्यक- बोधविषयकेच्छया उच्चरितमित्याकारकमस्ति, तच्च शाब्दबोधे कारणमपि योग्यताज्ञानादिवत् शुकप्रभृतिपक्षिणां वाक्येभ्योऽपि यत्र येषाञ्च शाब्दबोधो जायते तत्रापि ईश्वेरच्छयैवोपपत्तिः, अर्थात् तत्रेश्वरेच्छा रूपम् ईश्वरीयता तात्पर्यकारणम् । अपभ्रंशादिपदघटित- कुशादिवाक्येषु तान् शुकादीन् तादृशरूपेण शिशिक्षितुः पुरुषस्यैव तादृशं तात्पर्यं बोध्यम् । तादृशतात्पर्यज्ञानेनैव तत्र श्रोतृपुरुषस्य शाब्दबोधो जायत इति तु परमार्थो ज्ञेयः ।

अस्मिन् विषये केषाञ्चिद् विदुषामयमभिप्रायो यत् सकलं शाब्दबोधं प्रति तात्पर्यज्ञानस्य कारणतैव नास्ति, अर्थात् शाब्दबोधत्वावच्छेदेन तात्पर्यज्ञानस्य कारणत्वमेव न वर्तते अपि तु तादृशबोधत्वसामानाधिकरण्येनैव तात्पर्यज्ञानकारणता अस्तीति । एवञ्च नानार्थकपदघटितेभ्य एव वाक्येभ्यः शाब्दबोधोपपत्तये तात्पर्यज्ञानस्य शाब्दबोधं प्रति कारणत्वमस्तु - अनन्यगतिकत्वात्, न सर्वत्र । यथा- "घटमानय" इत्यादिवाक्यजन्य - शाब्दबोधे तात्पर्यज्ञानस्य किमर्थं कारणत्वं स्वीक्रियताम्, तात्पर्यज्ञानमन्तरैव अत्र शाब्दबोधो जायते, इतोऽतिरिक्तकारणेभ्यः । एवं शुकादिवाक्यजन्यशाब्दबोधेऽपि तात्पर्यज्ञानस्य कारणत्वं नास्ति, किन्तु नानार्थकपदघटितवाक्यस्थल एव तस्य कारणतास्वीकार्या तत्र नास्ति किमपि गत्यन्तरमिति तात्पर्यम् ।

यदि तात्पर्यज्ञानं कारणं न स्यात् तदा "सैन्धवमानय" इत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य च बोधो न स्यात् । न च तात्पर्यग्राहकाणां प्रकरणादीनां शाब्दबोधे कारणत्वमस्तु, तथा च सैन्धवमानयेत्यादौ सैन्धवपदजन्यलवणादिविषयकान्वयबुद्धौ तात्पर्यज्ञानजनकतयाऽभिमततत्तत्प्रकरणज्ञानत्वेन तत्तत् प्रकरणज्ञानस्यैव हेतुत्वमास्तामिति वाच्यम् । तेषां प्रकरणज्ञानेन कारणताबाधेन तादृशप्रकरणज्ञानस्य हेतुत्वं नैव भवितुमर्हतीति भावः । तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु लाघवात् तात्पर्यज्ञानस्यैव कारणत्वमस्त्विवति भावः ।

इत्थं च तात्पर्यज्ञानस्य कारणत्वस्वीकारे वेदस्थलेऽपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते, तथा च वेदस्थले ईश्वरीयतात्पर्यज्ञानमादाय तत्रत्यशाब्दबोध उपपादनीयः। यदि चाध्यापकतात्पर्यज्ञानं तत्रत्यस्थलीयशाब्दोपपत्तये परिकल्प्यते तदपि नोचितं प्रतिभाति, यतः सृष्टेरादौ अध्यापक एव कश्चिन्नास्ति, एवञ्च अध्यापकाभावात् कथं तत्र अध्यापकतात्पर्यज्ञानं कल्पयितुं शक्यत इति भावः। न च य एव नास्ति कुतः सर्गादिरिति वाच्यम् । प्रलयस्यागमेषु प्रतिपाद्यत्वात् । "यदा स जागर्ति तदा सृजति यदा निद्राति तदा सर्वं निमीलति" - विलासिन्यां तथा च यथा सुषुप्तिकाले कस्यचिददृष्टसहकारिनिरोधाद् भोगनिवृत्तिः, तथा प्रलयकालेऽपि सर्वात्मनामेकवृत्तिरोधाद् भोगनिवृत्तिरित्यर्थः । एवं तात्पर्यज्ञानस्य कारणत्वस्वीकारे शुकवाक्ये शुकतात्पर्याभावेऽपि ईश्वरीयतात्पर्यज्ञानमादयैव शाब्दबोधनिर्वाह्यो बोध्यः । विसंवादीच्छारूपतात्पर्यस्यैवाभावात् । अतस्तत्र शिक्षयितुरेव तात्पर्यज्ञानं कारणमिति मन्तव्यम् । वेदस्य नानार्थकत्वेन नानार्थवेदे अर्थविशेषे कस्य तात्पर्यावधारणं मन्तव्यमिति प्रश्ने समुपस्थित अनादिमीमांसापरिशोधितैः तर्कैरेवार्थावधारणं भवतीति शास्त्रकारैः स्वीकृतमिति तात्पर्यविषयेष्विति भावः ।

**शोधनिष्कर्षः**

शब्दजन्यबोधे निमित्तकारणानि चत्वारि सन्ति । तेषु आकाङ्क्षा -योग्यता- आसत्ति- तात्पर्याणि वाक्यसमयग्राहिका आकाङ्क्षा भवति । अयमर्थोऽर्थान्तरमाकाङ्क्षातीति व्यवहारस्य सर्वजनीनसिद्धान्तस्य सिद्धत्वात् सा च आकाङ्क्षा द्विधा १ उत्थिता २ उत्थाप्या च । यत्र उत्थिताऽकाङ्क्षा तत्र शाब्दबोधनिमित्तकारणविरहान्न शाब्दबोधः । अत

एव "घटम्" इत्युक्ते घटकर्मकज्ञानसत्वेऽपि आनयनादिक्रियाया ज्ञानाभावान्न शाब्दबोधः। "पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिताः" इति तार्किकवचनात् परस्परान्वयप्रयोजकत्वेन धर्मविशेषवत्वमेव योग्यताविषयत्वं वैयाकरणानां राद्धान्तः । अत एव वह्निना सिञ्चति "इत्यादिवाक्येषु वह्ने सेकान्वयप्रयोजकद्रवद्रव्यत्वाभावात् वाक्यमेवायोग्यं सिद्ध्यति । प्रकृतान्वयबोधाननुकूलपदाव्यवधानरूपस्यासत्तेः "पर्वतो वह्निमान् " इत्यासत्तिजशाब्दबोधस्य पर्वतो भुक्तं वह्निमान् देवदत्तेन" इत्यनासन्नाच्च शाब्दबोधो न जायते । एवञ्च "वक्तुरिच्छा तु तात्पर्यम्" एतद् वाक्यमिदं पदं वा एतदर्थविषयकबोधाय उच्चारणीयम्, इतीश्वरेच्छायाः तात्पर्यसत्वम्, उक्तेश्वरेच्छायाश्च शिष्टप्रयोक्तृमात्रस्य स्वबोधकत्वे सति स्वेतरबोधकत्वरूपोपलक्षणमिति तात्पर्यानुपपत्तिरूपमुपलक्षणस्य बीजञ्च बोध्यम्, तथा च बह्वर्थकेषु सैन्धव- हरि - पयसादिशब्देषु तात्पर्यनियामकत्वेन कारणानि इमानि यथा -

> संयोगो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यास्य सन्निधिः ॥
> सामर्थ्यमौचिती देश: कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥

भर्तृहरिणा उक्तैरेतैः शक्तिनियामकैः 'सैन्धवमानय" "पय आनय" इत्याद्यनियन्त्रितस्थलेषु प्रकरणवशात् वक्तुस्तात्पर्यनियामकत्वं निश्चित्य भोजनप्रसङ्गे लवणस्यानयनं यात्राप्रसङ्गे तु सज्जीकृत्य घोटकस्यानयनं भवति, तथैव पयसादिशब्दप्रयोगवाक्येष्वपि निश्चेतव्यमिति निष्कृष्टिः।

**सन्दर्भसामग्रीणां सूची**

अमरसिंहः (ई. १९७०). *अमरकोशः* (बालकृष्णचार्येण सम्पादितो नेपालीटीकया युतः). यशोदा- पुस्तकालयः।

उपाध्यायः,गङ्गेशः (ई. १९९०). *तत्वचिन्तामणिः* (पुनर्मु.). चौखम्बा- संस्कृत- प्रतिष्ठान।

दीक्षितः ,भट्टोजीः (ई. १९८६ ). *वैयाकरणसिद्धान्तकौमुदी* (पुनर्मु.) (बालमनोरमातत्वबोधिनीसहिता). मोतिलाल- बनारसीदास पब्लिशर्स-प्राइभेट लिमिटेड ।

पतञ्जलिः (ई.१९९९ ). *महाभाष्यम्*. प्रतिभाप्रकाशनम्, देहली।

पाणिनिः (२०५२). *धातुपाठस्य संस्कृतधातुकोशः (द्वि. सं.) (*युधिष्ठरमीमांसकः, विस्तृतभाषाकारः). रामलाल-कपूरद्रस्टः, वहालगढः, हरियाणा ।

पाणिनिः (२०५७). *अष्टाध्यायी* (च. सं.). चौखम्बा-सुरभारती- प्रकाशनम्।

बहादुरः, राजाराधाकान्तदेवः (ई. २००२). *शब्दकल्पद्रुमः* (पुनर्मु.). राष्ट्रिय-संस्कृत-संस्थानम्।

भट्टः, नागेशः (२०१७). *परमलघुमञ्जूषा* (ज्योत्स्नाटीकया समलङ्कृता, पं. कालिकाप्रसाद शुक्ल, टीकाका.). महाराजसयजिराव विश्वविद्यालयः।

भट्टः, कौण्डः (२०४५ ). *वैयाकरणभूषणसारः*. सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ।

भट्टः, नागेशः (२०५४). *परमलघुमञ्जूषा* (द्वि. सं.). कृष्णदास-अकादमी ।

भट्टाचार्यः, गदाधरः (२०४१). *व्युत्पत्तिवादः* (आदर्शाख्यया व्याख्यासंवलितः). वाणीविलासप्रकाशनम् ।

भट्टाचार्यः, विश्वनाथपञ्चाननः (२०४५). *न्यायासिद्धान्तमुक्तावली* (च. सं.). चौखम्बा-संस्कृत-संस्थानम् ।

भट्टाचार्यः,जगदीशतर्कालङ्कारः (२०४७). *शब्दशक्तिप्रकाशिक* (तृ.सं.). चौखम्बा-संस्कृत-संस्थानम्, ।

महादेव पुणातामाकारः (ई. १९३०). *न्यायकौस्तुभः* (प्रत्यक्षखण्डः) (गोपीनाथ-कविराजः, सम्पा.). जयकृष्णदासो गुप्तः ।

रघुनाथशिरोमणिः (२००५ ). *अवच्छेदकत्वनिरूक्तिः*. मास्टर-खेलाडीलालःएण्ड-सन्सः ।

शङ्कराचार्यः (ई. १९३५ ). *प्रपञ्चसारतन्त्रम्* (अटलानन्दसरस्वती, सम्पा.). मोतिलाल-बनारसीदास पब्लिशर्स- प्राइभेट लिमिटेड ।

शास्त्री, अशोकचन्द्रः (ई.१९९६ ). *प्रबन्धसंग्रहः*. भारतीय-विद्याप्रकाशन-संस्थानम् ।